# Shivakrita Sitastuti

# શિવકૃતા સીતાસ્તુતિઃ

## Document Information

Text title : Shivakrita Sita Stuti

File name : shivakRitAsItAstutiH.itx

Category : devii, sItA, stuti

Location : doc_devii

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : bhushuNDirAmAyaNam | pashchimakhaNDa | adhyAya 19/1-33||

Latest update : August 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 26, 2024

*sanskritdocuments.org*

# શિવકૃતા સીતાસ્તુતિઃ

મહાદેવ ઉવાચ ।
અહં હરિઃ પદ્મભવસ્તથાન્યે દેવા પદઙ્ઘ્રિદ્વિતયં પ્રપન્નાઃ ।
ભવન્તિ લોકે મહતામપીશાસ્તાં રામરામાં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૧॥

ગુહ્યં ચ તે નામ યદાસ્તિ નિત્યં ગૃહ્ણન્તિ યદ્વૈ સહજેતિ વેદાઃ ।
માતઃ સ્ફુટં તત્પ્રતિપાદ્યરૂપાં ત્વાં દેવતાં કામપિ સંશ્રયામિ ॥ ૨॥

વનં પ્રમોદાખ્યમનન્તકોટિશ્રીજુષ્ટમાનન્દમયં સમન્તાત્ ।
ત્વદ્વલ્લભો યત્ર ચ રામચન્દ્રો વિભાતિ કન્દર્પપરાર્ધ્યવેષઃ ॥ ૩॥

ભક્ત્યા પ્રયુક્તાં તદહં શ્રયામિ ભૂત્વા કદાચિત્ ખલુ કોઽપિ ગોપઃ ।
ચિરં યદાનન્દસમુદ્રમગ્નો બ્રહ્માક્ષરં વેદ ન કિઞ્ચિદેતત્ ॥ ૪॥

તવ સ્વરૂપં શ્રુતિભિર્વિમૃગ્યં બ્રહ્માદિદેવૈરપિ નૈવ ગમ્યમ્ ।
અધિપ્રમોદાટવિકુઞ્જવીથિષ્વદો વિસર્પત્યભિતઃ પદાભ્યામ્ ॥ ૫॥

શ ૃઙ્ગારનામા રસરાજ ઉચ્ચૈસ્તવૈવ દેહે કલિનપ્રતિષ્ઠઃ ।
યદંશમાત્રેણ જગત્સમસ્તં વિમોહિત સ્થાવરજઙ્ગમાઢ્યમ્ ॥ ૬॥

લક્ષ્મીઃ સ્વયં યા હરિસઙ્ગમેન પ્રમોદયન્તી હૃદયં વિભાતિ ।
સા ત્વત્કટાક્ષામૃતભૂરિવર્ષૈઃ પ્રભાવિનીતિ ધ્રુવમેવ વેદ્મિ ॥ ૭॥

વિના ત્વદઙ્ઘ્રિપ્રભવપ્રભાવં કુતો ભવેદૃદ્ધિરિતિ પ્રતીતમ્ ।
યતસ્ત્વદારાધનવઞ્ચિતાનાં ભવોદધૌ દુઃખપરમ્પરૈવ ॥ ૮॥

દિને-દિને યત્ર તવોદયેચ્છુઃ સખીસમૂહો યતતે ત્વદીશમ્ ।
વશે વિધાતું બહુભાવદૂત્યૈઃ સ તે વિલાસો હૃદયે મમાસ્તામ્ ॥ ૯॥

યથા પુમર્થાઃ પુરુષાય ભોગા યચ્છન્તિ ચત્વાર ઉદીર્ણરૂપાઃ ।
તથા સ્વતન્ત્રઃ ખલુ તે વિલાસઃ ફલાત્મકશ્ચૈવ ફલાર્પકશ્ચ ॥ ૧૦॥

તવૈવ નિત્યં વશવર્તિની સા માયાભિધા શક્તિરનન્તરૂપા ।

યથાખિલં મોહિતમેતદુચ્ચૈર્જગત્સ્વરૂપં પરતન્ત્રમેવ ॥ ૧૧॥

અચિન્ત્યરૂપા કરુણા ભવત્યાઃ શક્તા સમુદ્ધર્તુમુદેતિજીવાન્ ।
નો ચેત્કથં દુસ્તરમોહજાલં વિભિદ્ય પારં પરમં પ્રયાન્તિ ॥ ૧૨॥

પિતામહો યદ્વિતનોતિવિશ્વં રક્ષન્ હરિર્દ્રાવયતે ચ દૈત્યાન્ ।
અહં તથા સંહરણં કરોમિ તદેતદાભાતિ ભવત્પ્રસાદ ॥ ૧૩॥

યતોઽભવદ્વાઙ્મનસં નિવૃત્તં યદાપ્યનાવાપ્યમિહાસ્તિ કિઞ્ચિત્ ।
યદેવ સર્વૈર્મુનિભિર્ગૃહીતં તદેવ રૂપં પરમં ભવત્યાઃ ॥ ૧૪॥

અનન્તશક્તિપ્રભવપ્રભાવમનન્તસઙ્ખ્યાકા પુમર્થમૂલમ્ ।
અનન્તકાલક્ષપણાક્ષયં તે વિચેષ્ટિતં મે હૃદયે ચકાસ્તુ ॥ ૧૫॥

તડિલ્લતાવચ્ચ સુવર્ણવર્ણં રામાભ્રસમ્પર્કસદામનોજ્ઞમ્ ।
ધ્યાતં ન યૈસ્તે જનનિ સ્વરૂપં તેષાં ભવેઽસ્મિન્ જનુરેવ મોઘમ્ ॥ ૧૬॥

તાવન્મુખે જાડ્યમુદેતિ ભૂયસ્તાવદ્દરિદ્રો ભવતીહ લોકઃ ।
તવન્ન કાન્તિપ્રસરોઽસ્મિન્ દેહે યાવન્ન તેઽજાયત દૃષ્ટિપાતઃ ॥ ૧૭॥

અધિપ્રમોદાટવિકુઞ્જ મધ્યે શ્રીરામયોગેન સદા સ્ફુરન્તી ।
ઇન્દીવરશ્યામલલોચનાં ત્વાં સમ્પત્તિસંવિત્તિકૃતે ભજામિ ॥ ૧૮॥

યદ્વાગ્ભવં નામ નિરૂઢ઼ીજં પરાત્મકં વેદસમૂલમૂલમ્ ।
તત્તદ્વપુઃ સન્નિહિતં સમસ્તતન્ત્રેષુ મન્ત્રાત્મતયા ભજામિ ॥ ૧૯॥

કદાચિદુન્મીલિતમાનભાવોન્નતે ભ્રુવૌ મન્મથચાપચારૂ ।
શ્રીરામચન્દ્રૈકરસીન્દ્રભાવ્યે ભજામિ તે મુક્તકૃપાકટાક્ષે ॥ ૨૦॥

વેદાન્તવાક્યેષુ નિગૂઢમુચ્ચૈર્યત્તત્પરં બ્રહ્મ ચિદેકમાત્રમ્ ।
તસ્યાપિ ચેત્થં પરમાપ્રતિષ્ઠા તદા કથં વાગ્વિષયત્વમેષિ ॥ ૨૧॥

નિત્યે મહિમ્નિ પ્રથિતપ્રતિષ્ઠા ત્વેકે મહાગાથગુણૈકજુષ્ટા ।
અગોચરા બ્રહ્મશિવાદિભિસ્ત્વમધિપ્રમોદાટવિ દૃશ્યસે વૈ ॥ ૨૨॥

કદાપિ પઞ્ચત્વમિયાદ્વિરઞ્ચિસ્તથા વિરામં ભજતે રમેશઃ ।
ભજામ્યહં ચૈવ વિનાશભાવ તદા ત્વમીશઃ સ્વયમેવ ચાસિ ॥ ૨૩॥

ત્વદઙ્ઘ્રિપઙ્કેરુહગર્ભધૂલી ત્રિવેદમલ્લીસુમનોમધૂલીમ્ ।
વિચિન્વતાં જ્ઞાનયથેષ્વગમ્યામધિપ્રમોદાટવિ કિં ન લપ્સ્યે ॥ ૨૪॥

વેદાન્તવિજ્ઞાનવિનિશ્ચિતાર્થૈર્યોગેન કષ્ટેન ગૃહીતમન્ચૈઃ ।
તત્ત્વત્સ્વરૂપં પ્રમુદાટવીનામાભીરકન્યાભિરહો સુખાપમ્ ॥ ૨૫॥

યથાકથઞ્ચિદ્વિષયૈર્વિમુક્તા નૃપાં મનોવૃત્તિરુદીર્ણરૂપા ।
ત્વામપ્રમેયામવિલભ્ય સીતે કદર્થનીયા કિમુ મુક્તિમાર્ગે ॥ ૨૬॥

યે સ્વાશ્રયાં ચ પ્રવદન્તિ મુક્તિં તેષામહમ્ભાવિનષ્ટમાત્રા ।
બ્રહ્માસ્ત્રિરૂપાખલુ ચિત્તવૃત્તિરત્યર્થમેવપ્રવિભાતિ મોઘા ॥ ૨૭॥

યે ત્વત્પદાબ્જ પ્રભજન્તિ સન્તસ્તેષાં પરાનુગ્રહમાત્રવશ્યા ।
સ્વં બ્રહ્મધર્મં પ્રવિહાય માતઃ કરોષિ સાશ્ચર્યચરિત્રચર્યામ્ ॥ ૨૮॥

રજાંસિ ભૂમેઃ પ્રમિમાતુ કશ્ચિત્તથા તરઙ્ગાન્ જલધેર્બિભર્તુ ।
તથાપિ માતસ્તવ દિવ્યકેલીગુણાન્ ન સઙ્ખ્યાતુમસૌ સમર્થઃ ॥ ૨૯॥

નમસ્ત્રિવેદીશિરસિ સ્થિતાયૈ તતોઽપિ દૌર્લભ્યતમાન્વિતાયૈ ।
સ્વભક્તિમાત્રૈકસુલભાત્મને તે શ્રીસચ્ચિદાનન્દપદોન્નતાયૈ ॥ ૩૦॥

પ્રમોદવનવીથીષુ સહજાનન્દિની તુ યા ।
સા ત્વં જનકભૂપસ્ય ગૃહે માતઃ સમાગતા ॥ ૩૧॥

ભક્તાનુગ્રહકારિણ્યાઃ કો જાનાતિ તવ ક્રિયામ્ ।
ફલાનુમેયમાત્રત્વાત્તથાપિ ખલુ ગીયતે ॥ ૩૨॥

ઇત્યુચ્ચાર્ય શિવઃ સ્તોત્રં સીતાયાઃ પરમશ્રિયઃ ।
સાનન્દાશ્રુમિલન્નેત્રં દણ્ડવન્ન્યપતદ્ભુવિ ॥ ૩૩॥

ઇતિ શ્રીમદાદિરામાયણે બ્રહ્મભુશુણ્ડસંવાદે પશ્ચિમખણ્ડે
ભરતલક્ષ્મણીયે સીતાજન્મસ્તુતાવેકોનવિંશોઽધ્યાયઃ ॥ ૧૯॥

ભુશુણ્ડિરામાયણમ્ । પશ્ચિમખણ્ડ । અધ્યાય ૧૯/૧-૩૩॥

bhushuNDirAmAyaNam . pashchimakhaNDa . adhyAya 19/1-33..

Encoded and proofread by Mrityunjay Rajkumar Pandey

*Shivakrita Sitastuti*

pdf was typeset on August 26, 2024

Please send corrections to *sanskrit@cheerful.com*